वियोजितः, त्रि, वियोगं प्रापितः । विपूर्ब्बण्यन्त-युजधातोः क्तप्रत्ययेन निष्पन्नः ॥

विरक्तः, त्रि, (वि+रन्ज+क्तः ।) विरागयुक्तः । अननुरक्तः । यथा,—
"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥"
इति श्रीभागवते ११ स्कन्धे १८ अध्यायः ॥
(यथा च ।
"त्वयि प्रसन्ने मम किं गुणेन
त्वय्यप्रसन्ने मम किं गुणेन ।
रक्ते विरक्ते च वरे वधूनां
निरर्थकः कुङ्कुमराग एषः ॥"
इत्युद्भटः ॥)

विरक्ता, स्त्री, दुर्भगा । इति त्रिकाण्डशेषः ॥ अननुकूला । यथा, नीतिशतके । १ ।
"यां चिन्तयामि सततं मयि सा विरक्ता
सा चान्यमिच्छति जनं स जनोऽन्यरक्तः ।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च ॥"

विरक्तिः, स्त्री, (वि+रन्ज+क्तिन् ।) विरागः । यथा,—
"देहो गुरुर्मम विरक्तिविवेकहेतु-
र्बिभ्रत् स्म सत्त्वनिधनं सततार्त्त्युदर्कम् ।
तत्त्वान्यनेन विमृशामि यथा तथापि
पारक्यमित्यवसितो विचराम्यसङ्गः ॥"
इति श्रीभागवते । ११ । ९ । २५ ॥

विरङ्गं, क्ली, कङ्कुष्ठम् । इति राजनिर्घण्टः ॥

विरचितः, त्रि, (वि+रच+क्तः ।) विशेषेण रचितः । निर्म्मितः । यथा,—
"एष श्रीलहनूमता विरचिते श्रीमन्महानाटके
वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्धृते विक्रमैः ॥"
इत्यादि महानाटकम् ॥

विरजस्तमाः, [स्] पुं, सत्त्वगुणविशिष्टः । तत्-पर्य्यायः । द्वयातिगः २ । इत्यमरः ।२।७।४५॥
"विगते रजस्तमसी येषां ते रजस्तमोगुणशून्याः सत्त्वैकनिष्ठाः साक्षात्कृतब्रह्मणो जीवन्मुक्ता व्यासादयो द्वयातिगा उच्यन्ते । द्वयं द्वैतं अति-क्रम्य गच्छति इति डः ।" इति भरतः ॥

विरजाः, [स्] स्त्री, (विनिवृत्तं रजः शोणितं यस्याः ।) विगतार्त्तवा । इति जटाधरः ॥ (नास्ति रजो धूलिर्यत्र । धूलिरहिते, त्रि । यथा, महाभारते । १ । ९३ । १५ ।
"सर्व्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम् ।
एष नो विरजाः पन्था दृश्यते देवसद्मनः ॥"
निर्म्मलः । यथा, महाभारते । २ । ७ । ५ ।
"विरजोऽम्बरश्चित्रमाल्यो ह्रीकीर्त्तिद्युतिभिः सह ॥"
पुं, नागविशेषः । यथा, महाभारते ।१।३५।१४।
"विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्य-वान् ॥")

विरजा, स्त्री, कपित्थानीवृक्षः । इति रत्नमाला ॥ दूर्व्वा । इति हारावली ॥ ययातिमाता । यथा,
उत्पन्नाः पितृकन्यायां विरजायां महाबलाः ।
यतिर्ययातिः सर्य्यातिरायातिः पञ्चमो शुकः ।
तेषां ययातिः पञ्चानां महाबलपराक्रमाः ॥"
इति कौर्म्मे २० अध्यायः ॥
श्रीकृष्णसखी । सा राधाभयात्त्यक्तप्राणा सती सरिद्रूपाभवत् । तस्याः सप्त पुत्त्राः सप्त समुद्रा अभवन् । यथा,—
"एकदा राधिकासार्द्धं गोलोके श्रीहरिः स्वयम् ।
विजहार महारण्ये निर्ज्जने रासमण्डले ॥
कृत्वा विहारं श्रीकृष्णस्तामदृष्ट्वा विहाय च ।
गोपिकां विरजामन्यां शृङ्गारार्थं जगाम ह ॥
दृष्ट्वा च श्रीहरिस्तूर्णं विजहार तया सह ।
तयासक्तं श्रीहरिञ्च रत्नमण्डपसंस्थितम् ॥
दृष्ट्वा च राधिकान्याश्च चक्रुस्ताश्च निवेदनम् ।
जगाम सहसा देवी तं रत्नमण्डपं मुने ॥
द्वारे नियुक्तं ददर्श द्वारपालं मनोहरम् ।
तमुवाच रुषा देवी रक्तपङ्कजलोचना ॥
दूरं गच्छ गच्छ दूरं रतिलम्पटकिङ्कर ! ।
कीदृशीं मत्परां कान्तां द्रक्ष्यामि तत्प्रभो-रहम् ॥
श्रुत्वा कोलाहलं शब्दं गोपिकानां हरिः स्वयम् ।
ज्ञात्वा च कोपितां राधामन्तर्धानं चकार ह ॥
विरजा राधिकाशब्दात् अन्तर्धानं हरेरपि ।
दृष्ट्वा राधाभयार्त्ता सा जहौ प्राणांश्च योगतः ॥
सद्यस्तत्र सरिद्रूपं तच्छरीरं बभूव ह ।
व्याप्तञ्च वर्त्तुलाकारं तया गोलोकमेव च ।
कोटियोजनविस्तीर्णं प्रस्थेऽतिनिम्नमेव च ॥
दैर्घ्ये दशगुणं चारु नानारत्नाकरं परम् ।
राधा रतिगृहं गत्वा न ददर्श हरिं मुने ॥
विरजाञ्च सरिद्रूपां दृष्ट्वा गेहं जगाम सा ।
श्रीकृष्णो विरजां दृष्ट्वा सरिद्रूपां प्रियां सतीम् ॥
उच्चै रुरोद विरजातीरे नीरमनोहरे ।
त्वया विनाहं सुभगे कथं जीवामि सुन्दरि ! ॥
नद्यधिष्ठातृदेवी त्वं भव मूर्त्तिमती सति ।
पुरातनं शरीरं ते सरिद्रूपमभूत् सति ॥
जलादुत्थाय चागच्छ विधाय नूतनां तनूम् ।
आजगाम हरेरग्रं साक्षाद्राधेव सुन्दरी ॥
पश्यन्तं प्राणनाथञ्च पश्यन्ती वक्रचक्षुषा ।
ताञ्च रूपवतीं दृष्ट्वा प्रेमुणोद्रेकां जगत्पतिः ॥
चकारालिङ्गनं तूर्णं चुचुम्ब च मुहुर्मुहुः ।
नानाप्रकारशृङ्गारविपरीतादिकं प्रभुः ॥
रहसि प्रेयसीं प्राप्य चकार च पुनः पुनः ।
विरजा सा रजोयुक्ता धृत्वा वीर्य्यममोघकम् ॥
सद्यो बभूव तत्रैव धन्या गर्भवती सती ।
तस्थौ तत्र सुखासीना सार्द्धं पुत्त्रैश्च सप्तभिः ॥
एकदा हरिणा सार्द्धं वृन्दारण्ये सुनिर्ज्जने ।
विजहार पुनः साध्वी शृङ्गारासक्तमानसा ॥
एतस्मिन्नन्तरे तत्र मातुः क्रोड़ं जगाम ह ।
कनिष्ठपुत्त्रस्तस्याश्च भ्रातृभिः पीड़ितो भिया ॥
भीतं स्वतनयं दृष्ट्वा तत्याज तां कृपानिधिः ।
क्रोड़े चकार बालं सा कृष्णो राधागृहं ययौ ॥
प्रबोध्य बालं सा साध्वी न ददर्शान्तिकं प्रियम् ।
विललाप भृशं तत्र शृङ्गारातृप्तमानसा ॥
शशाप स्वसुतं कोपात् लवणोदो भविष्यसि ।
शशाप सर्व्वान् बालांश्च यान्तु मूढ़ा रसातलम् ॥
श्रुत्वा विवरणं सर्व्वे प्रजग्मुर्धरणीतलम् ।
सप्तद्वीपे समुद्राश्च सप्त तस्थुर्विभागशः ॥
कनिष्ठाद्वृद्धपर्य्यन्तं द्विगुणं द्विगुणं मुने ।
लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
एतेषाञ्च जलं पृथ्व्यां शस्यार्थञ्च भविष्यति ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २।३ अध्यायौ ॥
जगन्नाथक्षेत्रम् । यथा,—
"उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"
इति तन्त्रचूड़ामणौ ५१ पीठनिर्णयः ॥*॥ तत्र मुण्डनोपवासौ न कर्त्तव्यौ । यथा । स्कान्दे ।
"मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्ज्जयित्वा गयां गङ्गां विशालां विरजां तथा ॥"
इति प्रायश्चित्ततत्त्वम् ॥

विरञ्चः, पुं, ब्रह्मा । इति हेमचन्द्रः ॥

विरञ्चिः, पुं, ब्रह्मा । इति हेमचन्द्रः ॥

विरणं, क्ली, वीरणतृणम् । इति शब्दरत्नावली ॥

विरतः, त्रि, (वि+रम+क्तः ।) निवृत्तः । यथा—
"आत्तविद्यो मुनेर्जातो भ्रातुस्त्रातो निजैर्भवात् ।
विरतोऽन्तर्हितो दुष्टाच्छोकाद्रामेण वारितः ॥"
इति मुग्धबोधव्याकरणम् ॥

विरतिः, स्त्री, (वि+रम+क्तिन् ।) निवृत्तिः । तत्पर्य्यायः । आरतिः २ अवरतिः ३ उप-रामः ४ । इत्यमरः ॥ उपरमः ५ विरामः ६ । इति भरतः ॥ (यथा, कथासरित्सागरे । १०१ । ६ ।
"कृच्छ्राच्च दुःखदीर्घायां गतायां विरतिं निशि ॥")

विरलं, क्ली, दधि । इति राजनिर्घण्टः ॥

विरलः, त्रि, अवकाशः । फाक् इति भाषा । तत्पर्य्यायः । पेलवः २ तनुः ३ । इत्यमरः ॥ (यथा, वृहत्कथायाम् । ६७ । ३ ।
"शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरास-न्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःख-प्रदौ ॥")

विरलद्रवा, स्त्री, (विरलो निर्म्मलो द्रवो यस्याः ।) श्लक्ष्णयवागूः । यथा,—
"यवागूरुष्णिका श्राणा सैव तु द्रुतसिक्थिका ।
विलेपी तरला च स्यात् सा श्लक्ष्णा विरलद्रवा ॥"
इति जटाधरः ॥

विरहः, पुं, (वि+रह त्यागे+घः ।) विच्छेदः । तत्पर्य्यायः । विप्रलम्भः २ विप्रयोगः ३ वियोगः ४ । इति हेमचन्द्रः ॥ * ॥ (यथा, साहित्यदर्पणे । १० ।
"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गम-स्तस्याः ।